# श्री महावैद्यनाथशिवविरचिता
# ७२ मेळरागमालिका
## ताळम्ः आदि
## पल्लवि - श्रीरागम्

प्रणतार्तिहरप्रभो पुरारे प्रणवरूप संपदे पदे ।
प्रणमामि श्री प्रकृतिप्रेरक प्रमथगणपते पदे पदे ॥

## जति

तां तां तकणक धीं धीं धिमितरि किटतक तरिकुडु
तधीं धींकु तकधिमि तकतरि किटतक झम्
नादिरु दिरुधों दिरुदिरु दित्तिल्लाना दिरिना ताना दोंतिरि
तकणक तकजणु तकधिमि ध्रुकुडतत् तळाङ्गुतों तकतिक तधिङ्गिणतोम्

## अनुपल्लवि - चरणम्

कनकाङ्ग्या रमया पूजित सनकादिप्रिय कृपालय ॥ १ ॥
रत्नाङ्ग्या धर्मसंवर्धन्या रमण मां परिपालय ॥ २ ॥
गानमूर्तिरिति घनशास्त्रमानमूर्धन्यैर्गदितोऽसि ॥ ३ ॥
श्रीवनस्पतिदलसमर्चनेन पावनभक्तैर्विदितोऽसि ॥ ४ ॥
मानवतीभिः स्मृतिभिरुक्तकर्मकृन् मानवपापं वारयसि ॥ ५ ॥
तानरूपिणं त्वां भजन्ति ये तारमुपदिशंस्तारयसि ॥ ६ ॥
देवसेनापतिजनक नीलग्रीव सेवकजनपोषण ॥ ७ ॥
हनुमतो डिण्डिमभवं स्तुवतः सुतनुमतोऽददाभूतिभूषण ॥ ८ ॥
भानुकोटिसंकाश महेश धेनुकासुरमारकवाहन ॥ ९ ॥
आनन्दनाटकप्रियामरवर श्रीनन्दनाटवीहव्यवाहन ॥ १० ॥
कोकिलप्रियाम्रकिसलयाङ्ग गोकुलपालनपटुभयभञ्जन ॥ ११ ॥
बहुरूपावतीह भवान् मां मुहुर्मुहुरूर्जितभक्तजनरञ्जन ॥ १२ ॥

धीरभद्राख्यगायकप्रिय वीरभद्रादिपालितशरण ॥ १३ ॥
देवकुलाभरणोद्धारक श्रीवसुदेवकुलाभरणनतचरण ॥ १४ ॥
जितमाया माळवगौळान्तर्गतमाहेशाः त्वां विन्दन्ति ॥ १५ ॥
चक्रवाककुचार्धाङ्ग त्वत्कृपया शुक्रवाक्पतिसुराः नन्दन्ति ॥ १६ ॥
तेजसा जितसूर्यकन्त्या गौर्या ओजसाऽतुलप्रताप ॥ १७ ॥
शुभकर हाटकाम्बरिशराब्जनिभकर हतभक्तपरिताप ॥ १८ ॥
झंकारध्वनियुतमालाधर टंकारध्वनियुतचाप ॥ १९ ॥
महानट भैरवीमारुतिभारतीसहायदेवैर्नतकोप ॥ २० ॥
शिव नत्कीरवाणीवशग भवन इव वस मे मनसि ॥ २१ ॥
खरहरप्रियमालोक्य परात्पर हर दयया पालितवानसि ॥ २२ ॥
गौरीमनो हरिदम्बर सततं गौरिव वत्से रमते भवति ॥ २३ ॥
योऽसौ अरुणप्रियादित्यः तं त्वा सा श्रुतिरानता भवति ॥ २४ ॥
माररञ्जनीवरद निरहंकारजना मुक्त्यै त्वां स्तुवन्ति ॥ २५ ॥
चारु के शिवलिङ्गमनार्च्य मेरुधन्वन् सुखमाप्नुवन्ति ॥ २६ ॥
सरसां गीतिं कीर्तिं दिश मे तरसा अङ्गीकृतहतमदन ॥ २७ ॥
हरिकाम्भोधिसंभवामरदुरितनिवारक स्मितवदन ॥ २८ ॥
धीर शङ्कराभरणसमं त्वां घोरशङ्कया नो जाने ॥ २९ ॥
ज्ञानगानं कृतवतां वरद श्रीनगानन्दिनीजाने ॥ ३० ॥
यागप्रियामरत्यागप्रियं विधिं द्रागप्रियेण शिक्षितवानसि ॥ ३१ ॥
सदानन्दे त्वयि रागवर्धनीं मुदा पुनितवतीं रक्षितवानसि ॥ ३२ ॥
श्रितगजवदन गाङ्गेय भूषणीकृतभुजङ्ग नतसुरकदम्ब ॥ ३३ ॥
वागदीश्वरीश्रियौ यदङ्गसंभवे भोगमोक्षदा जगदम्बा ॥ ३४ ॥
शूलिनी तया धर्मवर्धन्या खेलसि दयया सुरवरिष्ठ ॥ ३५ ॥
कैलासाचलनातकृङ्गुजशैलदण्डकचरणाङ्गुष्ठ ॥ ३६ ॥

(प्रणतार्तिहर प्रभो पुरारे)

प्रतिबिंबरसालगफलसमा विषया इति बिम्बाधराः संत्यजन्ति ॥ ३७ ॥

ये भवजलार्णवं संतरितुं ते भवदङ्घ्रिनौकां भजन्ति ॥ ३८ ॥

झलं झलवराळिगीतमालाधर जलन्धरासुरमारक ॥ ३९ ॥

सुरदानवनीतामृतविमुख वरदाननिरत तारक ॥ ४० ॥

भोः पावनीपिष्टास्वादनरसिकभूप अव नीपवनसुन्दर ॥ ४१ ॥

रघुप्रियार्चितराजीवचरण मघप्रणाशन भुजमन्दर ॥ ४२ ॥

गवाम्भोधिः तीर्ण इव मया भवाम्भोधिः तव दयया ॥ ४३ ॥

इह प्रसन्नो भव प्रियतमया सह प्रमथप द्रागुमया ॥ ४४ ॥

सर्वशुभापं तु वराळिकाक्षं कुर्वनुग्रहं त्वां वन्देऽहम् ॥ ४५ ॥

सदय षड्विधमार्गिणि मनुजे हृदयग न कुर्वे संदेहम् ॥ ४६ ॥

सुवर्णां गीतिं समुपदिश प्रथमवर्णाङ्गीकृतवैकुण्ठ ॥ ४७ ॥

दिव्यमणिबन्धे बद्धनागकङ्कण भव्यमणिलसितश्रीकण्ठ ॥ ४८ ॥

सुबलारिमुखामरप्रपूजित धवळाम्बरीपतेर्दुर्दर्श ॥ ४९ ॥

सुरूपनामनारायणीसहचर स्वरूपभासकादर्श ॥ ५० ॥

धर्मकामवर्धनीविलसित निर्मलाङ्ग शुभदायक ॥ ५१ ॥

नितरां अप्रियवादिनि विमुख नतराम अग्निसायक ॥ ५२ ॥

चिदंबरगमनश्रमापहरणं कदंबरमण मम दीयताम् ॥ ५३ ॥

विश्वं भरितं त्वयाष्टमूर्त्या शश्वद्धनमाधीयताम् ॥ ५४ ॥

श्यामळाङ्गीकृतवामभाग कोमळाङ्गजशरभङ्ग ॥ ५५ ॥

षण्मुखप्रियाङ्कुप्रियजनक हिरण्मयाङ्गनत शरभाङ्ग ॥ ५६ ॥

हर सिंहेन्द्रमध्यमार्धाङ्ग नरसिंह अजिनाम्बर ॥ ५७ ॥

पुरहर हैमवतीमनोहर हर रक्षितसुरनिकर ॥ ५८ ॥

विदितधर्मौ अतिकायजिद्रामौ मुदितमनाः त्वं रक्षितवान् ॥ ५९ ॥

नीतिमतीह जनेऽतिप्रियोऽसि प्रीतिमतिरहितान् शिक्षितवान् ॥ ६० ॥

श्रियोऽधिकां तां अणिमादिदां पयोधिकान्तामणिसेविताम् ॥ ६१ ॥

धर्मवर्धनीं सुरर्षभप्रियां निर्मलभक्तैर्भाविताम् ॥ ६२ ॥

मननशीलतां गीर्वाणपतेः जननवर्जितामुक्तवतीम् ॥ ६३ ॥
भूमिषु वाचस्पतिसंबन्धस्वामिने ज्ञानं दत्तवतीम् ॥ ६४ ॥
मेचकल्याणीं वाचं दिशतीं मोचकदायिनीं रमसे ॥ ६५ ॥
विचित्राम्बरीषवरदभाग सचित्रगुप्तयमागः क्षमसे ॥ ६६ ॥
सुचरित्रमुखभक्तसङ्गीत सुचरित्रमुखरितवाद्य ॥ ६७ ॥
ज्योतिःस्वरूपिणि त्वयि प्रसन्ने भाति स्वरूपं किं नाद्य ॥ ६८ ॥
धातुवर्धनीं तवाभिधासुधां पातुकामिनी मम रसना ॥ ६९ ॥
सुखेन आसिकाभूषणं हि सतां मुखे नासिकेव विवसन ॥ ७० ॥
कोसलपः त्वाऽऽपूज्याघं हित्वा सभापते मुमुदे हि ॥ ७१ ॥
भक्तापदानरसिकप्रिय त्यक्तापदानन्दं मम देहि ॥ ७२ ॥

(प्रणतार्तिहर प्रभो पुरारे)

इति श्रीमहावैद्यनाथशिवविरचिता
मेळरागमालिका समाप्ता